# Shri Mukambika Suprabhatam

# શ્રીમૂકામ્બિકા સુપ્રભાતમ્

## Document Information

Text title : Mukambika Suprabhatam

File name : mUkAmbikAsuprabhAtam.itx

Category : devii, suprabhAta, otherforms, devI

Location : doc_devii

Transliterated by : NA

Proofread by : PSA Easwaran, NA

Latest update : June 29, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# શ્રીમૂકામ્બિકા સુપ્રભાતમ્

ઉત્તિષ્ઠોત્તિષ્ઠ મૂકામ્બા ઉત્તિષ્ઠ જગદીશ્વરિ ।
નિદ્રાં મુઞ્ચ મહામાયે ત્રિલોકીં પરિપાલય ॥ ૧॥

બ્રહ્મર્ષિસિદ્ધમુનિસઙ્ઘમુપેત્ય દેવિ
    ત્વદ્દ્વારદેશમધિતિષ્ઠતિ દર્શનાર્થમ્ ।
નિદ્રાં જહિ હ્યમલભક્તજનાનુકમ્પે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨॥

બ્રહ્મેન્દ્રરુદ્રવરુણા ભગવાનનન્ત-
    શેષો ધનેશ શશિભાસ્કરવહ્નિમુખ્યાઃ ।
તત્ત્વં ત્વદીયમવગન્તુમુપસ્થિતાસ્તે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩॥

વાલ્મીકિકશ્યપપરાશરગૌતમાદિ-
    ભૃગ્વઙ્ગિરા સનકનારદવામદેવાઃ ।
દ્વાર્યાગતાઃ સગુણરૂપમુપાસિતું તે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪॥

વિદ્યાધરપ્રમથકિન્નરયક્ષનાગ-
    ગન્ધર્વસિદ્ધપિતરશ્ચ સમાસ્થિતાસ્તે ।
દ્રષ્ટું તવાઙ્ઘ્રિયુગલં કૃતકૃત્યતાર્થં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૫॥

ત્વદ્દર્શનાય વિધિવદ્વિહિતાગ્નિહોત્રા
    તિષ્ઠન્ત્યુપાયનકરા ઋષયો મુનીન્દ્રાઃ ।
ઉત્તિષ્ઠ જાગૃહિ મહેશ્વરિ મુઞ્ચ નિદ્રાં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૬॥

ક્ષેત્રં મહદ્ફલદમન્યસુકર્મકર્તુઃ

કોલાપુરં તવ મહીતલપુણ્યભૂમિમ્ ।
આયાન્તિ સાધકજનાસ્તપસેઽતિદૂરાત્
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૭॥

ઇત્થં પુરશ્ચરણયોગ્યમતિપ્રશાન્તં
ક્ષેત્રં પવિત્રમિહ સિદ્ધજના વસન્તિ ।
ત્વત્સન્નિધૌ ભવભયાર્તિવિનાશનાય
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૮॥

ત્રૈયન્તવેદ્યવિભવે નિગમાતિદૂરે
સૃષ્ટિસ્થિતિપ્રલયકારિણિ સર્વનાથે ।
ભક્તાર્તિનાશિનિ સદાચરણપ્રસન્ને
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૯॥

કલ્યાણિ મઙ્ગલમયે નિજબોધરૂપે
ભક્તેષ્ટદાનનિરતે ભવસિન્ધુસેતો ।
કોલર્ષિનારદમુખૈરુપગીતકીર્તે
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૦॥

શ્રીમન્મહેશ્વરિ સદાશિવવલ્લભેતિ
કામેશ્વરીતિ ભજતાં ભયહારિણીતિ ।
વાગીશ્વરીતિ મનસાં વચસામગમ્યે
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૧॥

સર્વાશ્રિતે જનનિ ચન્દ્રકલાવતંસે
કમ્ભાસુરાસુહરશક્તિધરે ભવાનિ ।
મૂકામ્બિકેતિ સતતં પ્રવદન્તિ સન્તઃ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૨॥

ઇન્દ્રાદિ સર્વવિબુધામલશક્તિરાશે
મૂકાસુરાખ્યખલદાનવદર્પનાશે ।
ચન્દ્રાર્ધધારિણિ લસચ્છુભભાલદેશે
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૩॥

શૈલાધિરાજતનયે પરદિવ્યરૂપે
શુમ્ભાસુરપ્રમુખદૈત્યવિનાશશીલે ।
સદ્વૃત્તભક્તજનદુઃખભયાર્તિહન્ત્રિ

મુકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૪॥

ત્વં ભક્તરક્ષણવિધૌ વિવિધસ્વરૂપં
ધૃત્વા વિનાશયસિ દુષ્ટજનં સલીલમ્ ।
એતેન તે પ્રકટિતા ભજકાનુકમ્પા
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૫॥

જ્યોતિર્મયં નિખિલદૈવતસારભૂતં
સર્વાર્તિહં મુનિસુરાર્ચિતદિવ્યલિઙ્ગમ્ ।
કોલાપુરે લસતિ ગર્ભગૃહે ત્વદીયે
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૬॥

નિષ્કામભક્તનિવહાશ્ચ સકામકાશ્ચ
જિજ્ઞાસવત્સહૃદયાશ્ચ નિતાન્તભક્ત્યા ।
સ્વસ્વાધિકારમનુસૃત્ય ભજન્તિ સર્વે
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૭॥

શ્રદ્ધાલવો જપતપશ્ચરણાનુરક્તાઃ
કુર્વન્તિ સાધનમસહ્યમપિ ત્વદીયાઃ ।
સિદ્ધિં પ્રયાન્તિ ચ તતત્પદમગ્રહેણ  variation  તતઃ પરમશ્રમેણ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૮॥

સંસારસાગરસમુદ્ધરણૈકહેતોઃ
સર્વાભિલાષમપહાય ભજન્ત્યનન્યાઃ।
તેષાં પ્રસીદસિ મનોરથપૂરણાય
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૧૯॥

ત્વત્પાદપદ્મભજનાર્ચનતત્પરાણાં
માતર્ભયં ભરસિ ભાવુકસજ્જનાનામ્ ।
ત્વત્સેવનાદ્વિગતકલ્મષમાનસાનાં
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૦॥

સૌમ્યં વપુઃ સુલલિતં તવ સુપ્રસન્નં
શિષ્ટેષુ કોમલતમં સદયં તથાપિ ।
દુષ્ટેષુ નિર્દયમતીવ ભયં કરોતિ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૧॥

સઞ્ચિન્તયે યદિ ગતં તવ સૌમ્યરૂપં
    શ્રીપાઞ્ચજન્યવરદાભયચક્રહસ્તમ્ ।
પદ્માસનોપરિ રતં સ્મિતહાસ્યયુક્તં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૨॥

આલસ્યદોષનિહતાઃ ખલુ ભાગ્યહીનાઃ
    પ્રારબ્ધકર્મ બલવન્મનુજા વદન્તિ ।
તે તુ પ્રયત્નવિમુખાઃ પ્રપતન્તિ દુઃખે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૩॥

ચિત્તસ્ય શુદ્ધિમખિલસ્ય મમાસ્તુ કર્મ
    સત્કર્મશુદ્ધહૃદયે મનુજો વિકારી ।
શુદ્ધિં વિના ન મનસો નિજબોધલાભઃ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૪॥

સર્વત્ર ચઞ્ચલતરં ભ્રમમાણદીનં
    માં પાલય હ્યવિરતં દયયેતિ માતઃ ।
વિશ્વાસતસ્તવપદં શરણં પ્રપદ્યે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૫॥

નાહં તપશ્ચરણમર્ચનસાધનં વા
    જાનામિ કર્તુમભયં કુરુ પાહિ માતઃ ।
જાને ન કેવલવિધિં કિમપીહ દીનઃ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૬॥

ભાવેન દેશમનિશં વશમાનયન્તિ
    ભાવોઽપિ કારણમતઃ કવયો વદન્તિ ।
ત્યાકેશસાદૃશમિહાદ્ય ભવાનિ ભાવં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૭॥

યદ્ભાવનાન્વિતહૃદા ભવતીં ભજન્તિ
    તદ્ભાવનાનુસરણં ચ તવ સ્વભાવઃ ।
તસ્માદ્ભજામિ ભવબન્ધવિમોચનાય
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૮॥

યાદન્તરઙ્ગદમનં વિષયેષુ શાન્તિઃ
    દાન્તિશ્ચ બાહ્યવિષયેષુ વિનિગ્રહાખ્યા ।

શીતોષ્ણદુઃખસૂખયોઃ સહનં તિતિક્ષા
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૨૯॥

વેદોક્તકર્મનિચયાચરણેન નિત્યં
    વાક્કાયમાનસિકપાપસમૂલનાશમ્ ।
વાઞ્છન્તિ ભાવુકજનસ્ત્વદનુગ્રહેણ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૦॥

શક્તિસ્તુ સર્વજગતાં તવ દેવ્યધીના
    વિશ્વં સૃજસ્યવસિ હંસિ ચ દેવિ કાલે ।
લિલેયમીશ્વરિ તવાતુલદિવ્યરૂપે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૧॥

મોહાન્ધકારચરમૂઢજનો ન ચૈતત્
    જાનાતિ દેવિ જગતીતિ તવૈવ માયા ।
માયાસ્વરૂપમવલમ્બ્ય તનોષિ વિશ્વં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૨॥

સૃષ્ટ્વા ચરાચરમિદં જગદાત્મશક્ત્યા
    તસ્મિન્પ્રવિશ્ય વિવિધં ચ તનોષિ રૂપમ્ ।
તસ્માન્ન ચાસ્તિ કિમપીહ વિના ત્વયાત્ર
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૩॥

ધૂમ્રાક્ષલોહિતભવૌ મધુકૈટભૌ ચ
    ચણ્ડં ચ મુણ્ડમપિ શુમ્ભનિશુમ્ભ સૌખ્યૌ ।
દુર્ગેતિ હંસિ જગતઃ સુખશાન્તિસિદ્ધ્યૈ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૪॥

દુર્ગેતિ દુર્ગતિહરં તવ નામધેયં
    શ્રીશામ્ભવીતિ ચ સુખઙ્કરમપ્રમેયમ્ ।
સંસારસાગરસમુદ્ધરણં શિવેતિ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૫॥

તેજોમયં સુરમણીયમતિ પ્રસન્નં
    અત્યન્તસુન્દરમતીવ મનોભિરામમ્ ।
સ્વેચ્છાધૃતં લલિતરૂપમિદં ત્વદીયં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૬॥

સચ્ચિત્સુખં તુ નિગમાગમશાસ્ત્રસારં
    જ્ઞાનં તુ શોભનમતીન્દ્રિયકં સુવેદ્યમ્ ।
શ્રુત્યૈવ સદ્ગુરુમુખાદધિગમ્યમમ્બ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૭॥

કેચિત્ સ્વકર્મફલમેવ વદન્તિ ધીરાઃ
    ભક્તિં તથા નવવિધામપરે મહાન્તઃ ।
અન્યે વિરક્તિમતુલાં પરમાપ્તિમાહુઃ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૮॥

શ્રદ્ધાસિ દેવિ નિખિલાગમકર્મમૂલા
    ભ્રાન્તિશ્ચ મોહજનનેન ભયાર્તિમૂલા ।
ત્વત્સેવયા જનહિતં વિધિતું સમર્થઃ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૩૯॥

કામેશ્વરિ પ્રણતભક્તજનાનુકમ્પે
    સર્વાન્તરઙ્ગયમુને પરિપૂર્ણરૂપે ।
મામુદ્ધરોદ્ધર ભવાદ્ભવતાપહન્ત્રિ
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૦॥

બુદ્ધિપ્રચોદિનિ ચરાચરવિશ્વરૂપે
    નિષ્કલ્મષં કુરુ મહેશિ મમાન્તરઙ્ગમ્ ।
મજ્જન્મસાર્થકમિહાસ્તુ તવ પ્રસાદાત્
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૧॥

સા ત્વં દયામયિ મયેપ્સિત ભુક્તિમુક્તિં
    સર્વં પ્રદાપય જગજ્જનનીશપૂજ્યે ।
સર્વજ્ઞતાસિ તવ દેવિ મહાનુભાવે
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૨॥

ઐશ્વર્યવન્તરહિતં કમલાલયે ત્વં
    જ્ઞાનં ચ સર્વવિષયં તવ દેહિ મહ્યમ્ ।
આનન્દતુન્દિલમનોરથમપ્રમેયં
    મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૩॥

એકાપિ સર્વગતયા ત્વમનેકરૂપા

અન્તો ન લભ્યત ઇતિ ત્વમનન્તરૂપા ।
સૂક્ષ્માતિસૂક્ષ્મકતયા ત્વમલક્ષ્યરૂપા
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૪॥

શાન્તં વિશિષ્ટકમનીયકલાવિચિત્રં
સાન્નિધ્યપૂર્ણમતિસુન્દરમન્દિરં તે ।
પ્રારાજતે કુટજપર્વતમૂલદેશે
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૫॥

અષ્ટાધિકેષુ વિવિધેષ્વપિ શક્તિપીઠેષુ
અષ્ટાદશેષ્વપિ તથા નવકોટિમૂર્તિઃ ।
એકાપ્યનેકશુભરૂપધરા વિભાસિ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૬॥

નાનુષ્ઠિતં કિમપિ સાર્થકકારિ કાર્યં
લબ્ધ્વાપિ ચોત્તમજનિં સુવિચારમગ્રમ્ ।
તાપત્રયાર્થભયભીતમિમં પ્રપાહિ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૭॥

ત્વન્નામરૂપમમલં નિગમાર્થસારં
નિત્યં નિરઞ્જનમનન્તમજં પુરાણમ્ ।
બ્રહ્મેતિ શાશ્વતમખણ્ડસુખં વદન્તિ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૮॥

સ્વાન્તઃસુખાય વરદે સુમતિપ્રકાશં
કૃત્વાવ મામિતિ પુનઃપુનરર્થયામિ ।
સચ્ચિત્સુખાનુભવશાન્તિહૃદં કુરુષ્વ
મૂકામ્બિકે પરશિવે તવ સુપ્રભાતમ્ ॥ ૪૯॥

ત્વદ્દાસદાસગણનાયકસત્યશાસ્ત્રી
યાચત્યનન્તભવ આર્તજનાનુકમ્પે ।
ભક્તિં પ્રયચ્છ ભવતાપવિનાશયિત્રિ
કોલાપૂરેશ્વરિ શિવે તવ સુપ્રભાતમ્ ॥ ૫૦॥

મઙ્ગલં તેઽસ્તુ મૂકામ્બા મઙ્ગલં સર્વમઙ્ગલે ।
મઙ્ગલં તવ સદ્રૂપં ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૫૧॥

ઇતિ શ્રીમૂકામ્બિકા સુપ્રભાતં સમાપ્તમ્ ।

Proofread by PSA Easwaran, NA

*Shri Mukambika Suprabhatam*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*